# Sudarshana Upanishad

# સુદર્શનોપનિષત્

## Document Information

Text title : sudarshanopaniShat

File name : sudarshanopaniShat.itx

Category : upanishhat, vishhnu, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# સુદર્શનોપનિષત્

યજ્ઞોપવીતી ધૃતચક્રધારી યો બ્રાહ્મણો બ્રહ્મવિદ્બ્રહ્મવિદાં મનીષી
હિરણ્યમાદાય સુદર્શનં કૃત્વા વહ્નિસંયુક્તં સ્ત્રીશૂદ્રૈર્બાહુભ્યાં
ધારયેત્ । તસ્માદ્ગર્ભેણ જાયતે । બ્રાહ્મણસ્ય શરીરં જાયતે ।
શ્રીવિષ્ણું સર્વેશ્વરં ભજન્તિ ॥

નાસાદિકેશપર્યન્તમૂર્ધ્વપુડ્રં તુ ધાગ્યેત્ ।
ઉદ્ધૃતાસિ વરાહેણ કૃષ્ણેન શતબાહુના ।
ભૂમિર્ધેનુર્ધરણી લોકધારિણી ॥

મૃત્તિકે દેહિ મે પુષ્ટિં ત્વયિ સર્વં પ્રતિષ્ઠિતમ્ ॥

તસ્માદ્દ્વિરેખં ભવતિ । તં દેવકીપુત્રં સમાશ્રયે । અગ્નિના વૈ હોત્રા
ચક્રં પાઞ્ચજન્યં પ્રતપ્તં દ્વયોર્ભુજયોર્ધારયેત્ । આત્મકૃતમાચરેત્ ।
આચાર્યસ્ય સમ્મુખં પ્રપદ્યેત । તસ્માદ્વૈકુણ્ઠં ન પુનરાગમનં
સાલોક્યસામીપ્યસારૂપ્યસાયુજ્યં ગચ્છતિ । ય એવં વેદ । ઇત્યુપનિષત્ (૯)
"યજ્ઞોપવીતોપનિષત્" ઇત્યાખ્યયા યા પૂર્વં પ્રકાશિતા
સૈવેયમેતદવધીતિ વિભાવ્યતામ્ ।
Footnote
યજુર્વેદે તૃતીયકાણ્ડે તૃતીયપ્રશ્ને -
"કક્ષમુપૌષેદ્યદિ દહતિ પુણ્યસમં ભવતિ
યદિ ન દહતિ પાપસમમેતેન"। ઉષ દાહે । ઉપકક્ષં ભુજઃ ।
"ચરણં પવિત્રં વિતતં પુરાણમ્ । યેન પૂતસ્તરતિ દુષ્કૃતાનિ ।
તેન પવિત્રેણ શુદ્ધેન પૂતાઃ । અતિપાપ્માનમરાતિં તરેમ । લોકસ્ય
દ્વારમર્ચિમત્પવિત્રમ્ । જ્યોતિષ્મદ્ભ્રાજમાન મહસ્વત્ । અમૃતસ્ય
ધારા બહુધા દોહમાનમ્ । ચરણં નો લોકે સુધિતાં દધાતુ" ।
"પવિત્રં તે વિતતં બ્રહ્મણસ્પતે । પ્રભુર્ગાત્રાણિ પર્યેષિ વિશ્વતઃ ।
અતપ્તતનૂર્ન તદામો અશ્નુતે । શ઼ૃતાસ ઇદ્વહન્તસ્તત્સમાશત ।"

યો હ વૈ સુશ્લોકમૌલે ધર્માનનુતિષ્ઠમાનોઽગ્નિના ચક્રં યોઽગ્નિર્વૈ
સહસ્રારસ્સહસ્રારો નેમિર્નેમિના તપ્તતનૂસ્સાયુજ્યં સલોકતામાપ્નોતીતિ ॥

ચક્રં બિભર્તિ વપુષાભિતપ્તં બલં દેવાનામમૃતસ્ય વિષ્ણોઃ ।
સ એતિ નાકં દુરિતા વિધૂય વિશન્તિ યદ્યતયો વીતરાગાઃ ॥

ચમૂષચ્છ્યેનશ્શકુનો બિભૃત્વા ગોવિન્દદ્રપ્સ આયુધાનિ બિભ્રત્ (?) ।
અપામૂર્મિં સચમાનસ્સમુદ્રં તુરીયં ધામ મહિષો વિવક્તિ (?) ॥

શઙ્ખચક્રોર્ધ્વપુણ્ડ્રાદિધારણં સ્મરણં હરેઃ ।
તદીયારાધનં ચૈવ ભક્તિર્બહુવિધા સ્મૃતા ॥

પશુપુત્રાદિકં સર્વં ગૃહોપકરણાનિ ચ ।
અઙ્કયેચ્છઙ્ખચક્રાભ્યાં નામ કુર્યાચ્ચ વૈષ્ણવમ્ ॥

પશુર્મનુષ્યઃ પક્ષી વા યે ચ વૈષ્ણવસંશ્રયાઃ ।
તેનૈવ તે પ્રયાસ્યન્તિ તદ્વિષ્ણોઃ પરમં પદમ્ ॥

દક્ષિણે તુ ભુજે વિપ્રો બિભૃયાદ્વૈ સુદર્શનમ્ ।
સવ્યે તુ શઙ્ખં બિભૃયાદિતિ બ્રહ્મવિદો વિદુઃ ॥

બ્રાહ્મણૈઃ ક્ષત્રિયૈર્વૈશ્યૈઃ શૂદ્રૈશ્ચ કૃતલક્ષણૈઃ ।
અર્ચનીયશ્ચ સેવ્યશ્ચ નિત્યયુક્તૈઃ સ્વકર્મસુ ॥

યે કણ્ઠલયતુલસીનલિનાક્ષમાલા
યે બાહુમૂલપરિચિહ્નિતશઙ્ખચક્રા ।
યે વા લલાટફલકે લસદૂર્ધ્વપુણ્ડ્રાઃ
શ્રીવૈષ્ણવા ભુવનમાશુ પવિત્રયન્તિ ॥

પઞ્ચાર્દ્રતત્ત્વવિદુષાં પઞ્ચસંસ્કારસંસ્કૃતમ્ ।
પઞ્ચાવસ્થાસ્વરૂપં તે વિજ્ઞેયં સતતં વિભો ॥

પઞ્ચસંસ્કારયુક્તાનાં વૈષ્ણવાનાં વિશેષતઃ ।
ગૃહાર્ચનવિધાને ન શઙ્ખં ઘણ્ટારવં ત્યજેત્ । ઇતિ ।
એતદથર્વશિરો યોઽધીતે ય ઊર્ધ્વપુણ્ડ્રં વિધિવદ્વિદિત્વા ધારયતિ
સ વૈદિકો ભવતિ । સ કર્માર્હો ભવતિ । અનેન તેજસ્વી યશસ્વી
બ્રહ્મવર્ચસ્વી ભવતિ । અનેક કાયિકવાચિકમાનસપાતકેભ્યઃ પૂતો ભવતિ ।
શ્રીવિષ્ણુસાયુજ્યમવાપ્નોતિ । શ્રીવિષ્ણુસાયુજ્યમવાપ્નોતિ । ય એવં વેદ ।
ઇત્યુપનિષત્ ॥

(વૈષ્ણવ-ઉપનિષદઃ)

ઇતિ સુદર્શનોપનિષત્ સમાપ્ત ।

Proofread by Kasturi navya sahiti

---

*Sudarshana Upanishad*

pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*